"अमितो देवलः सत्यः शर्यमाली महागिराः ।
अर्कावसुः सुमित्रश्च मैत्रेयः शुनकी बलिः ॥")
शुनकचञ्चुका, स्त्री, (शुनकस्य चञ्चुरिव । इवार्थे कन् । ) क्षुद्रचञ्चुक्षुपः । इति राजनिर्घण्टः ॥
शुनकचिल्ली, स्त्री, (शुनकप्रिया चिल्ली ।) शाकविशेषः । तत्पर्य्यायः । खचिल्ली२ श्वानचिल्लिका ३ । अस्या गुणाः । कटुत्वम् । तीक्ष्णत्वम् । लघ्वव्रणनाशित्वञ्च । इति राजनिर्घण्टः ।
शुनाशीरः, पुं, ( शुनाशीरौ वायुसूर्य्यौ अस्य स्त इति । अर्श-आदित्वादच् । ) इन्द्रः । इति भरतद्विरूपकोषः ॥
शुनासीरः, पुं, (शुनासीरौ वायुसूर्य्यौ अस्य स्त इति । शुनासीर + अर्श आद्यच् । ) इन्द्रः । यथा,—
"शुनाशीरो द्वितालव्यः शुनासीरो द्विदन्त्यकः तालव्यादिर्दन्त्यमध्यः शुनासीरश्च दृश्यते ॥"
इत्यमरटीकायां भरतः ॥
( यथा, तैत्तिरीयसंहितायाम् । १।८।७।१ ।
"इन्द्राय शुनासीराय पुरोडाशमिति ॥" * ॥
वायुसूर्य्यौ । इति निघण्टुः ।५।३॥"शु-शब्दार्थविशिष्टात् शुन गतौ इत्यस्मात् इगुपधलक्षणः कः । क्षिप्रं गच्छत्यन्तरिक्षमिति शुनो वायुः यद्वा, शु-शब्दोपपदादयतेर्गतिकर्मणः अन्येष्वपि दृश्यते इति डः । भाष्ये तु शु एतदर्थतो निर्वचनं प्रायेण । सर्त्तेः 'डिण्डीरवानीरगभीर गभीर-कुभीर-शीरकाश्मीरजम्बीरकीरतीरादयः' इति ईरन्-प्रत्ययष्टिलोपश्च निपात्यते । सदा सरणात् सीर आदित्यः । शुनश्च सीरश्च देवताद्वन्द्वे च इत्यङ् ।" इति तट्टीकायां देवराजयज्वा ॥*॥ इन्द्रवायू । यथा, ऋग्वेदे । ४ । ५७ । ८ ।
"शुनासीरा शुनमस्मासु धत्तम् ॥")
"हे शुनासीरा इन्द्रवायू आदित्यौ वा ।" इति । तद्भाष्ये सायणः )
शुनिः,पुं, (शुनति क्षिप्रं गच्छतीति । शुन गतौ + "इगुपधात् कित् ।" उणा० ४।११८। इति इन् । स च कित् । ) कुक्कुरः । इति हेमचन्द्रः
शुनी,स्त्री,(श्वन् + गौरादित्वात् ङीष् ।)कुक्कुरी । इत्यमरः ॥ ( यथा, भागवते । ८ । १८।११ ।
"अहो निरीक्ष्यतामस्या दास्याः कर्म्म ह्यसाम्प्रतम् ।
असम्हार्य्यं हृतवती शुनीव हविरध्वरे ॥")
कुष्माण्डी । इति राजनिर्घण्टः ॥
शुनीरः पुं,कुक्कुरीसमूहः । इति त्रिकाण्डशेषः
शुन्ध, क शुद्धौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् । क, शुन्धयति । अयमात्मने पदीत्येके । इति दुर्गादासः ॥
शुन्ध, ञ शुद्धौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-उभ०-अक०-सक०च-सेट् । ) शुद्धिरिह शुद्धीभावः शुद्धीकरणञ्च । ञ, शुन्धति शुन्धते जलेन लोकः । यो गां शुन्धति सत्येनेति हलायुधः । गां वाचम् । इति दुर्गादासः ॥

शुन्ध्युः, पुं, (शुन्ध शुद्धौ + "यजिमनिशुन्धिदसिजनिभ्यो युच् ।" उणा० ३ । २० । इति युच् ।) अग्निः । इत्युणादिकोषः ॥ ( आदित्यः । पक्षिविशेषः । यथा, ऋग्वेदे । १ । १२४ । ४ ।
"उपो अदर्शि शुन्ध्युवो न वक्षः ॥"
"शुन्ध्युरादित्यः सर्व्वेषां शोधकत्वात् ***यद्वा-शुन्ध्युरिति जलचरः श्वेतवर्णः पक्षिविशेषः ।" इति तद्भाष्ये सायणः ॥ )
शुन्भ, श दीप्तिहिंसनयोः । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-अक०-हिंसने सक०-सेट् ।) श, शुभति शुम्भति । शुशोभ शुशुम्भ । इति दुर्गादासः ॥
शुन्यं, क्ली, शुनीसमूहः । इति त्रिकाण्डशेषः ॥ रिक्ते, त्रि । इति जटाधरः ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"शुन्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चित् शनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ॥"
शुने हितम् । श्वन् + "उगवादिभ्यो यत् ।" ५।१।२। इति यत् । "शुनः सम्प्रसारणं वा च दीर्घत्वम् ।" इत्युक्त्या सम्प्रसारणम् ॥ )
शुभ,प श दीप्तिहिंसनयोः । इति कविकल्पद्रुमः । ( तुदा०-पर०-अक०-हिंसने सक०-सेट् । प श, शुभति शुशोभ । प्राञ्चस्तु ह्लादौ च शुभ शुन्भ भासनहिंसनयोरिति पठन्ति । इति दुर्गादासः ॥
शुभ, लृ ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् । ) लृ, अशुभत् । ङ, शोभते । न शोभति सभामध्ये इति गणकृतानित्यत्वादिति रमानाथः । वस्तुतस्तु शोभति शोभः पचादित्वादच् । ततः शोभ इवाचरतीति क्वौ साध्यम् । इति दुर्गादासः ॥
शुभं, क्ली, ( शोभते इति । शुभ दीप्तौ + कः ।) मङ्गलम् । इत्यमरः॥ (यथा, कथासरित्सागरे । १२४ । ११२ ।
"अहो मूर्खोऽयमशुभं शुभमित्यभिनन्दति ॥"
पद्मकाष्ठम् । इति राजनिर्घण्टः ॥ (उदकम् । इति निघण्टुः । १ । १२ ॥ शुभपर्य्याये शुभमित्यव्ययमप्यस्ति । इति काशिका । ५।२ । १४० ॥ )
शुभः, पुं, ( शोभते इति । शुभ + कः ।) विष्कुम्भादिसप्तविंशतियोगान्तर्गतत्रयोविंशयोगः । तत्र जातफलम् । यथा, कोष्ठीप्रदीपे ।
"शुभप्रसूतः शुभलक्षणानां शुभोदयेष्टो विदुषां समाजे ।
करोति नित्यं शुभकर्म्म धीमान् शोभाधिकः शोभनवेशधारी ॥"
शुभः, त्रि, ( शुभमस्यास्तीति । अर्शआद्यच् । ) क्षेमशाली । ( यथा, मनुः । ८ । २८७ ।
"पश्चाद्गत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु ॥" ) खसवारिपुरम् । इति मेदिनी । भे, ८ ॥

शुभंयुः, त्रि, (शुभमस्यास्तीति । शुभम् + "अहंशुभमोर्युस् ।" ५ । २ । १४० । इति युस् । ) मङ्गलान्वितः । इत्यमरः ॥ ( यथा, रघुः ।८।६।
"अधिकं शुशुभे शुभंयुना द्वितयेन द्वयमेव सङ्गतम् ॥" )
शुभगन्धकं, क्ली, ( शुभो गन्धो यस्य । ) बोलम् । इति राजनिर्घण्टः ॥ मङ्गलगन्धयुक्ते, त्रि ॥
शुभग्रहः, पुं, ( शुभः ग्रहः । ) सौम्यग्रहः । स तु गुरुः शुक्रः पापायुतबुधः अर्द्धाधिकचन्द्रश्च । यथा,—
"अर्द्धो नेन्दुः कुजो राहुः शनिस्त्रीर्युत इन्दुजः । रविः पापा भवन्त्येते शुभाश्चान्ये प्रकीर्त्तिताः॥"
इति सारसंग्रहः ॥
तद्वारे शुभकर्म्मकरणं यथा,—
"शुभग्रहार्कवारे च मृदुक्षिप्रध्रुवेषु च ।
शुभराशिविलग्ने च शुभं शान्तिकपौष्टिकम् ॥"
इति संस्कारतत्त्वम् ॥
शुभङ्करः, त्रि, ( शुभं करोतीति । शुभ + कृ + खच् । ) मङ्गलकारकः । यथा, भूरिप्रयोगे ।
"क्षेमङ्करः क्षेमकारी भद्रङ्करशुभङ्करौ ॥"
स्वनामख्यातशास्त्रकारके, पुं ॥
शुभङ्करी, स्त्री, ( शुभं करोति या । कृ + खच् ङीष् । ) पार्व्वती । इति शब्दरत्नावली ॥
शुभदः,पुं,(शुभं ददातीति । दा + कः ।) अश्वत्थवृक्षः । इति राजनिर्घण्टः॥ शुभदातरि, त्रि ॥
( यथा, बृहत्संहितायाम् । ८ । २२ ।
"अपरस्यां स्वात्याद्यं ज्येष्ठाद्यं चापि मण्डलं शुभदम् ॥")
शुभदन्ती, स्त्री, ( शुभौ दन्तौ यस्याः । ङीष् । ) पुष्पदन्तभयोषित् । सुदती । इति मेदिनी ॥
शुभपत्रिका, स्त्री, ( शुभानि पत्राणि यस्याः । स्वार्थे कन् । टापि अत इत्वम् । ) शालपर्णी । इति राजनिर्घण्टः॥ मङ्गलपत्रिका च ॥
शुभवासनः, पुं,(शुभं शोभनं यथा तथा वासयति मुखमिति । शुभ + वस + णिच् + ल्युः ।) मुखवासकरगन्धः । यथा,—
"मुखवासकरो गन्ध आमोदी मुखवासनः ।
सुखवासन इत्येके शुभवासन इत्यपि ॥"
इति शब्दरत्नावली ॥
शुभसूचनी, स्त्री, ( शुभं सूचयतीति । सूच् + णिच् + ल्युः । स्त्रियां ङीष् ।) देवीविशेषः । सुवचनीति ख्याता । सा च स्त्रिया पूज्या । तस्याः ध्यानं यथा,—
"रक्ता पद्मचतुर्म्मुखी त्रिनयनी चामीकराकल्पता पीनोत्तुङ्गकुचाढुकूलवसना हंसाधिरूढ़ा परा ब्रह्मानन्दमयी कमण्डलुकराभाभीतिहस्ता शिवा ध्येया सा शुभसूचनी त्रिजगतामस्वापदुद्धारिणी ॥"
इत्याचारमार्त्तण्डः ॥
शुभस्थली, स्त्री, ( शुभा स्थली । ) यज्ञभूमिः । इति केचित् ॥ मङ्गलभूमिश्च ॥